श्री गुरुभ्यो नमः हरिः ॐ

अथ श्रीमदानन्दतीर्थ भगवत्पादाचार्यविरचितः

श्री कृष्णजयन्ती निर्णयः

रोहिण्या मध्यरात्रे[1] तु यदा कृष्णाष्टमी[2] भवेत् ।
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशनी[3] ॥ १॥

यस्यां जातो हरिः साक्षान्निशीते भगवानजः ।
तस्मात्तद्दिनमत्यन्तं[4] पुण्यं[5] पापहरं स्मृतम्[6] ॥ २॥

तस्मात्सर्वैरुपोष्या सा जयन्ती नाम सा[7] सदा ।
द्विजातिभिर्विशेषेण तद्भक्तैश्च विशेषतः ॥ ३॥

यो भुङ्क्ते तद्दिने मोहात्[8] पूयशोणितमत्ति सः ।
तस्मादुपवासेत् पुण्यं[9] तद्दिने[10] श्रद्धयान्वितः ॥ ४॥

---

[1] रोहिण्यामर्धरात्रे
[2] कालाष्टमी
[3] सर्वपापप्रणाशनम्
[4] अत्यर्थम्
[5] परम्
[6] शुभम्, परम्
[7] वै
[8] लोभात्
[9] नित्यम्
[10] तद्दिनम्

कृत्वा शौचं यथा न्यायं स्नानं कुर्यादतन्द्रितः ।
प्रभात काले मेधावी[11] योगायेति यथाविधि[12] ॥ ५ ॥

नित्याह्निकं प्रकुर्वीत भगवन्तमनुस्मरन् ।
मध्याह्नकाले च पुनः[13] सायङ्काले त्वतन्द्रितः ॥ ६ ॥

स्नायीत पूर्वमन्त्रेण वासुदेवमनुस्मरन् ।
ततः पूजां प्रकुर्वीत विधिवत्सुसमाहितः ॥ ७ ॥

यज्ञायेति च मन्त्रेण श्रद्धाभक्तियुतः पुमान् ।
कृष्णं च बलभद्रं च वसुदेवं च देवकीम् ॥ ८ ॥

नन्दगोपं यशोदाञ्च सुभद्रां तत्र पूजयेत् ।
(अर्घ्यं दत्वा समभ्यर्च्यांभ्युदिते शशिमण्डले) ।
जातः कंसवधार्थाय भूभारोत्थारणाय च ॥ ९ ॥

कौरवानां विनाशाय दैत्यानां निधनाय च ।
पाण्डवानां हितार्थाय धर्मसंस्थापनाय च ॥ १० ।

गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरेः ।
अर्घ्यं दत्वासमभ्यर्च्यांभ्युदिते शशिमण्डले ॥ ११ ॥

क्षीरोदार्णवसम्भूत अत्रिनेत्र[14] समुद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितः शशिन् ॥ १२ ॥

दत्वाऽर्घ्यं मनुनाऽनेन ह्युपस्थाय विधुं बुधः ।
शशिने चन्द्रदेवाय सोमदेवाय चेन्दवे ॥ १३ ॥

---

[11] कुर्वीत
[12] योगायेत्यादिमन्त्रतः
[13] पुमान्
[14] अत्रिगोत्र

मृगिणे शीतबिम्बाय[15] लोकदीपाय दीपिने ।
(रोहिणीसक्तचित्ताय कन्यादानप्रदायिने[16]) ।
शीतदीदितिबिम्बाय तारकापतये नमः ॥ १४ ॥

उपसंहृत्य तत्सर्वं ब्रह्मचारी जितेन्द्रियः ।
विश्वायेति च मन्त्रेण ततः स्वापं समाचरेत् ॥ १५ ॥

ततो नित्याह्निकं कृत्वा शक्तितो दीयतां धनं ।
सर्वायेति च मन्त्रेण ततः पारणमाचरेत् ।
धर्मायेति ततः स्वस्थो मुच्यते सर्वकिल्बिषैः ॥ १६ ॥

इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचितं

श्री कृष्णजयन्तीनिर्णयं सम्पूर्णम्

॥ भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु॥

[15] सितबिम्बाय, शशिबिम्बाय
[16] तारकापतये नमः